# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा - शास्त्री-३, सेमेस्टर-५ | प्रश्नपत्रम् - ८ | गुणाः - ७० |
| विषयः - धर्मशास्त्रम् | कोड - CE-3.5.10 | समयः - ११-०२ |
| दिनाङ्कः - २.१२.२०१६ | ग्रन्थः - मनुस्मृतिः मन्वर्थटीकासहिता ( ९-१० अध्यायौ ) | |

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ सन्दर्भपुरस्सरं द्वयोः श्लोकयोः व्याख्या विधेया ।** ०८

*(१) पिता रक्षति कौमारे भर्ता रक्षति यौवने ।*
*रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥*

*(२) क्षेत्रभूता स्मृतानारी बीजभूतः स्मृतः पुमान् ।*
*क्षेत्रबीजसमायोगात् सम्भवः सर्वदेहिनाम् ॥*

*(३) प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थं च मानवाः ।*
*तस्मात् साधारणो धर्मः श्रुतौ पत्न्या सहोदितः ॥*

**प्रश्नः २** *(१) नवमाध्यायस्य वर्ण्यविषयान् प्रतिपादयत ।* ०८

*आहोस्वित्*

*(२) स्वयंवरकालमुक्त्वा कन्यावरयोः वयो नियमान् वर्णयत ।*

**प्रश्नः ३ द्वयोः टिप्पणी कार्या ।** ०४

*(१) दायभागः ।* *(२) विभागकालः ।*
*(३) स्त्रीस्वभावः* *(४) स्वयंवरकालः ।*

**प्रश्नः ४ अधस्तनेषु पञ्चैव समाधेयाः ।** ०५

*(१) विवाहात्पूर्वं स्त्रीणां रक्षकः कः ?*
*(२) जायाशब्दस्य कोऽर्थः ?*
*(३) क्षेत्रभूतायां बीजभूतः कः ?*
*(४) क्षेत्रबीजयोर्मध्ये किं प्रधानम् ?*
*(५) विसर्गशब्दस्य कोऽर्थः ?*
*(६) शास्त्रकारेण सन्तानाभावे सपिण्डेषु को नियुक्तः ?*
*(७) मनुस्मृत्यनुसारेण विवाहार्थं वरकन्ययोः वयः किम् ?*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ५ ससन्दर्भौ द्वौ श्लोकौ व्याख्येयौ ।** ०८

*(१) औरसः क्षेत्रश्चैव दत्तः कृत्रिम एव च ।*
*गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥*

*(२) सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः ।*
*त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते ॥*

| | | |
|---|---|---|
| (३) | *साराऽसारं च भाण्डानां देशानां च गुणाऽगुणन् ।*<br>*लाभाऽलाभं च पण्यानां पशूनां परिवर्धनम् ॥* | |
| **प्रश्नः ६** | *(१) औरसादीनां द्वादशानां लक्षणानि लिखत ।*<br>*अथवा*<br>*(२) अनपत्यधने मातुरधिकारानुक्त्वा महापातकीदण्डं वर्णयत ।* | ०८ |
| **प्रश्नः ७** | **एकस्यैव टिप्पणी कार्या ।**<br>*१. विदेशादिगतस्य भागः ।    २. मातृधनविभागः ।* | ०२ |
| **प्रश्नः ८** | **अधस्तनेषु द्वयोः उत्तरं देयम् ।**<br>*(१) कः क्षेत्रजपुत्रः ?*<br>*(२) राजा चौरान् कथं दण्डयेत् ?*<br>*(३) राज्यस्य कति प्रकृतयः भवन्ति ?*<br>*(४) शूद्रकस्य को धर्मः ?* | ०२ |

## तृतीयान्वितिः ( युनिट - ३ )

| | | |
|---|---|---|
| **प्रश्नः ९** | **अधस्तनेषु श्लोकद्वयं व्याख्येयम् ।** | ०८ |
| (१) | *ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।*<br>*चतुर्थ एकजातिस्तु शूद्रो नाऽस्ति तु पञ्चमः ॥* | |
| (२) | *प्रतिकूलं वर्तमाना बाह्या बाह्यतरान् पुनः ।*<br>*हीना हीनान् प्रसूयन्ते वर्णान् पञ्चदशैव तु ॥* | |
| (३) | *वेदाभ्यासो ब्राह्मणस्य क्षत्रियस्य च रक्षणम् ।*<br>*वार्ताकर्मैव वैश्यस्य विशिष्टानि स्वकर्मसु ॥* | |
| **प्रश्नः १०** | *(१) दशमाध्यायस्य सारांशो लेख्यः ।*<br>*अथवा*<br>*(२) चतुर्णां वर्णानां के विशेषधर्माः ? वर्णयत ।* | ०८ |
| **प्रश्नः ११** | **द्वयोः टिप्पणी लेख्या ।**<br>*(१) वर्णानां ब्राह्मणः प्रभुः    (२) ब्राह्मणस्याऽऽपद्धर्मः ।*<br>*(३) ब्राह्मणस्य षट् कर्माणि    (४) मनुस्मृतिः ।* | ०४ |
| **प्रश्नः ११** | **लघूत्तरं लिखत ।( पञ्चानाम् )**<br>*(१) कति वर्णाः के च ते ?*<br>*(२) वर्णत्रयेषु वेदाध्यापनं कस्य दायित्वम् ?*<br>*(३) के व्रात्याः ?*<br>*(४) वैश्यस्य जीविकासाधनानि कानि ?*<br>*(५) केषां विक्रयणेन ब्राह्मणः पतति ?*<br>*(६) दशमाऽध्याये कति श्लोकाः ?*<br>*(७) मन्वर्थटीकाकारः कुत्रत्यः ?* | ०५ |

=०=